दि भवकर्मचिन्ते ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयं सुरापानहृदायुक्तं गुरुतल्पकटि
द्वयम् तत्संसर्गिपदद्वंद्वमंगप्रत्यंगपातकम् उपपातकरोमाणं रक्तश्मश्रुविलोचन
म् खड्गचर्मधरं क्रुद्धं वामकुक्षौ विचिंतयेत् ततः धूम्रवर्णं वामेन सिप्रवर्णं यमिति
वायुबीजं षोडशवारं जपन् वामनासापुटेन वायुना देहमापूर्य पुनः यमिति चतुष्
षष्टिवारं जपन् कुंभकं कुर्वन् देहं संशोष्य पुनः यमिति द्वात्रिंशद्वारं जपन् दक्षना
सापुटेन वायुं रेचयेत् ततो रक्तेन वायुसंबद्धेन रमिति वह्निबीजेन रमिति वह्नि
बीजेन षोडशवारं जपन् दक्षिणनासापुटेन देहमापूर्य चतुःषष्टिवारं जपन् कुंभ
कं कुर्वन् तद्दग्धीभूतमिति विचिंत्य रमिति द्वात्रिंशद्वारं जपन् वामनासया भस्म
ना सह वायुं रेचयेत् ततः ठमिति चन्द्रबीजं भ्रूमध्ये ध्यात्वा वामनासापुटेन पुनः
स्वकं ललाटचंद्रे षोडशवारं जपन् ध्यायेत् ततो वमिति वरुणबीजं चतुःषष्टिवारं जपन्

३

८

ललाटचंद्राद्विलोमामृतधारमयीं सुषुम्णां निर्माय तयादेवोपासनयोग्यं सकलं वपुः
कुर्वन् लमिति द्वात्रिंशद्वारं जपन् सकलं शरीरं दृष्टं भूतं विचिंत्य तन्नाम्ना पुटेन
वायुरेव येन पुनरन्यादेये देहं रूपविवर्तं परमात्मनः परं ब्रह्मत्वमिति कामायामातृकाम
कृतिः पश्य अजायत जगत्तस्मात् आकाशं नभसोऽनिलः समीरणाद्भूद्वह्निर्वह्नेरापस्त-
तो मही सौयमेभ्यो भूतेभ्यस्तनोत् रूपं कलेवरम् देवतागायत्रे योग्यमन्यत्र मिति भा-
वयन् तस्मिन्देहे परमात्मा यः सर्वज्ञः सर्वशक्तिमान् समस्तदेवमातृरूपः सर्वमंत्रमयः स्वय-
मात्मरूपेण देहे स्वजीवभावेन तिष्ठति इत्येवं भावनामत्स्यामुद्रिकहोदिता नाम-
पुटे भूत्वा वायुमवष्टभ्य हंसः सोहं अवतर २ शिवपदात् जीव शिवं सुषुम्णापथे-
न प्रविशस्वंगानि मन्त्रसोल्लसत् ज्वल २ प्रज्वल २ हंसः सोहमिति स्वाहा ततः प्रतिमा-
दौ विनस्याति यथा स्थाने स्थापयित्वा ह्यत्र देवी समानीय हृदि हंसं दत्वा प्राणप्रति-
ष्ठां कुर्यात् यथा आं सोहं मम प्राणा इह प्राणाः आं सोहं मम जीव इह स्थितः आं सोहं म-
म सर्वेन्द्रियाणि वाङ्मनश्चक्षुः श्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा इति बी-
जेन्यसेत् प्राणप्रतिष्ठामन्त्रो यथा मायाहंसमम्बायं हंस सर्वावियोगनः इत्येवं
मेषानि विविधेयमूवर्तीभवेत् प्राणप्रतिष्ठामंत्रेयं सर्वकर्माणि साधयेत् तत्र

स्वतंत्राकारः सबिंदुरिति प्रोक्तः तेनक्रोसोहमिति विपरीतः तेनक्रोसोहमिति मंत्रः एतत्क
रणाच्छक्त्यात्मा एतन्मात्रमात्रेणैव भूतशुद्धिः स्यादिति ततः प्राणायामं कुर्यात् मूलमंत्रे
णबालयावाकुर्यात् यथा मूलमंत्रं षोडशवारं जपन् वामनासापुटेन देहमापूरयेत्पुन
र्नासापुटौ धृत्वा तदेव चतुःषष्टिवारं जपन् कुंभकं कुर्वन् पुनस्तदेव द्वात्रिंशद्वारं जपन्
दक्षनासापुटेन वायुं रेचयेत् इत्येकः प्राणायामः अथांतर्मातृकान्यासः षोडशपत्रांबुजे
कंठे स्वरान्षोडश विन्यसेत् द्वादशच्छदे हृत्पद्मे कादीन्द्वादश विन्यसेत् दशपत्रांबुजे ना।
भौ डकारादीन्न्यसेद्दश षट्पत्रे लिंगमध्यस्थे बकारादीन्न्यसेत्षट् आधारे चतुरो वर्णा
न्वादीन्न्यसेच्चतुर्दले हक्षौ भ्रूमध्यगे पद्मे द्विदले विन्यसेच्छिवे इत्यंतर्मातृकान्यासमंत्री
गन्यासमाचरेत् अथ मातृकामान्यासः मूर्धा च मुखवृत्तं च नेत्रकर्णेषु यावंति नासागंडौ
ष्ठे दंतेषु मूर्धास्येषु प्रविन्यसेत् पाणिपादयुगसंधिः साग्रेषु तथा शिवे पार्श्वद्वये पृष्ठे
नाभि जठरेषु यथाक्रमान्न्यसेत् यादीन्सप्तधातुकान्प्राणजीवप्रलापरिणतान्न्यसेत् हृदये।
बाहुमूले च तथा परगले शिवे ककारादीन् हृदयपर्यंते पाणिपादयुगे तथा जठरानलयोर्व्य
व्यापकं चक्रमान्न्यसेत् व्यापकमिति हृदयमारभ्याङ्गमांगव्यापकमित्यर्थः हृदयपर्यंते
प्राणादिविशेषणाम् सर्वाङ्गलाभाय एवं हृदयमारभ्य पाणिपादयुगेन ततः तन्निहेयमेवार्थः यथा ये

हि हि हि

आंनमोमुखवृत्ते इंनमोदक्षचक्षुषि ईंनमोवामचक्षुषि उंनमोदक्षकर्णे ऊंनमोवामक
र्णे ऋंनमोदक्षनासायां ॠंनमोवामनासायां लिंनमोदक्षगण्डे लींनमोवामगण्डे एंनम
ओष्ठे ऐंनमोऽधरे ओंनमऊर्ध्वदन्ते औंनमोऽधोदन्ते अंनमोमूर्ध्नि अःनमोमुखे कंनमोदक्ष
बाहुमूले खंनमःकूर्परे गंनमोमणिबन्धे घंनमोऽङ्गुलिमूले ङंनमोऽङ्गुल्यग्रे चंनमो।
वामबाहुमूले छंनमःकूर्परे जंनमोमणिबन्धे झंनमोऽङ्गुलिमूले ञंनमोऽङ्गुल्यग्रे।
टंनमोदक्षोरुमूले ठंनमोजानुनि डंनमोगुल्फे ढंनमोऽङ्गुलिमूले णंनमोऽङ्गुल्यग्रे तं
नमोवामोरुमूले थंनमोजानुनि दंनमोगुल्फे धंनमोऽङ्गुलिमूले नंनमोऽङ्गुल्यग्रे पं
नमोदक्षपार्श्वे फंनमोवामपार्श्वे बंनमःपृष्ठे भंनमोनाभौ मंनमउदरे यंनमस्त्व
गात्मनिहृदये रंनमोऽसृगात्मनिदक्षबाहुमूले लंनमोमांसात्मनिककुदि वंनमो
मेदात्मनिवामबाहुमूले शंनमोऽस्थ्यात्मनिहृदयादिदक्षकरे षंनमोमज्जात्मनिहृ
दयादिवामकरे संनमःशुक्रात्मनिहृदयादिदक्षपादे हंनमःप्राणात्मनेहृदयादि
वामपादे ळंनमोजीवात्मनेहृदयाद्युदरे क्षंनमःपरमात्मनेहृदयादिमुखे अथश्री
कण्ठादिन्यासः यथा वामदेवऋषिःपङ्क्तिःछन्दः ईशानोदेवता न्यासकर्मणिविनि
योगः क्रोंहृदयायनमःइत्यादिन्यस्यध्यायेत् ॐबन्धूककाञ्चननिभंरुचिराक्षमालां

श्री॰
२३४

पाशांकुशौ च वरदे निजबाहुदंडैः बिभ्राणमिंदुशकलाभरणं त्रिनेत्रं अर्धांबिकेशमनिशं व
पुराश्रयामः ॥ इति ध्यात्वा मातृकास्थाने न्यसेत् ॥ अं श्रीकंठाय पूर्णोदर्यै नमो ललाटे आं अनं
ताय विरजायै नमो मुखे इं सूक्ष्माय शाल्मल्यै नमः ईं त्रिमूर्तये लोलाक्ष्यै नमः उं अमरेश्वराय वर्तु
लाक्ष्यै नमः ऊं अर्घीशाय दीर्घघोणायै नमः ऋं भारभूताय दीर्घमुख्यै नमः ॠं अतिथीशा
य गोमुख्यै नमः लृं स्थाणुकाय दीर्घजिह्वायै नमः लॄं हराय कुंडोदर्यै नमः एं झिंटीशाय ऊ
र्ध्वकेश्यै नमः ऐं भौतिकाय विकृतमुख्यै नमः ओं सद्योजाताय ज्वालामुख्यै नमः औं अनुग्रहे
श्वरायोल्कामुख्यै नमः अं अक्रूराय श्रीमुख्यै नमः अः महासेनाय विद्यामुख्यै नमः कं क्रोधीशा
य महाकाल्यै नमः खं चंडेशाय सरस्वत्यै नमः गं पंचांतकाय गौर्यै नमः घं शिवोत्तमा
य त्रैलोक्यविद्यायै नमः ङं एकरुद्राय मंत्रशक्त्यै नमः चं कूर्माय आत्मशक्त्यै न
मः छं एकनेत्राय भूतमात्रे नमः जं चतुराननाय लंबोदर्यै नमः झं अजेशाय
द्राविण्यै नमः ञं सर्वेश्वराय नागर्यै नमः टं सोमेश्वराय खेचर्यै नमः ठं लांगलि
ने मंजर्यै नमः डं दारुकाय रूपिण्यै नमः ढं अर्धनारीश्वराय वीरिण्यै नमः णं उमाका
ताय काकोदर्यै नमः तं आषाढिने पूतनायै नमः थं दंडिने भद्रकाल्यै नमः दं अत्री
शाय योगिन्यै नमः धं मीनेशाय शंखिन्यै नमः ॥ ॥ ॰

234

नं भीषणाय गर्जिन्यै नमः पं लोहिताय कालरात्र्यै नमः फं शिखीशाय कुब्जिन्यै नमः
बं छगलण्डेशाय कपर्दिन्यै नमः भं द्विरण्डेशाय कपालिन्यै नमः मं महाकालेशा-
य जयायै नमः यं त्वगात्मने बालिशाय सुमुखेश्वर्यै नमः रं असृगात्मने भुजंगे-
शाय रेवत्यै नमः लं मांसात्मने शिवेशाय माधव्यै नमः वं मेदात्मने संवर्तकेशा-
य मायायै नमः अथ बीजन्यासः नाभेराचरणं न्यस्य गलादा नाभि वाग्भवम् मूर्धादि ग-
लपर्यन्ते अन्त्यं विन्यसेत्क्रमात् इति बालामंत्रन्यासः एवं भैरवमंत्रपदेऽपि नाभेराच-
रणं न्यस्य वाग्भवं मंत्रवित्क्रमः हृदयान्नाभिपर्यन्ते कामराजं प्रविन्यसेत् मूर्धादिहृ-
दयान्ते च शक्तिबीजं प्रविन्यसेत् यथा नाभेराचरणं यावत् ह्सैं नमः हृदयादिना-
भिपर्यन्ते हसकलरीं नमः ब्रह्मरन्ध्रादि हृदयं यावत् ह्सौं नमः अथ करन्यासः वाम-
पाणितले चैकं दक्षपाणितले तथा उभयोः संपुटे विद्यात् त्रिबीजं विन्यसेत् प्रिये भै-
रवीमंत्रपदे आद्यं द्वितीयं करयोस्तार्तीयं तूभयोर्न्यसेत् इत्क्रमेण ह्सैं नमो दक्ष-
करे हसकलरीं नमो वामकरे ह्सौं नमः करतलसंपुटयोः मूर्ध्नाधारे हृदि न्यस्य सृष्टो
बीजत्रयं क्रमात् शिरसि ह्सैं नमः हृदि हसकलरीं नमः मूलाधारे ह्सौं नमः अथ
नवयोनिन्यासः दक्षकर्णे ह्सैं नमः वामकर्णे हसकलरीं नमः चिबुके ह्सौं नमः ।

श्री.
२३५
235

गंडयोः कर्णयोः वदने च नेत्रयोः नासिकायां श्रोत्रयोः जठरे भ्रुवोर्योः कुक्षौ जान्वोः लिंगे
पादयोः गले पार्श्वयोः हृदि स्तनयोः कंठे इति न्यसेत् मूले रतिं हृदि प्रीतिं भ्रूमध्ये मनोभ-
वम् बालाबीजैर्विभिन्नं समस्तानेषु विशेषतः मूलाधारे रत्यै नमः हृदि क्लीं प्रीत्यै नमः
भ्रूमध्ये सौः मनोभवाय नमः अष्टदले शक्तियोगेशी विश्वयोनि क्रमादिमाः विलोमबीजै
विन्यस्य मूर्तिन्यासं समाचरेत् विलोमबीजैरिति सौः आदि बालाबीजैर्विन्यसेत् मूला
धारे सौः अष्टदले ऐं नमः हृदि क्लीं योगेश्यै नमः भ्रूमध्ये ऐं विश्वयोन्यै नमः ततो मूर्तिन्या
सं कुर्यात् मस्तके महर्षि ईशानाय भव सहिताय नमः मुखे महर्षि तत्पुरुषाय मकरध्व
ज सहिताय नमः हृदि महर्षि अघोराय कुमार कंदर्प सहिताय नमः गुह्ये महर्षि वा-
मदेवाय मनोभव सहिताय नमः पादयोः महर्षि सद्योजाताय कामदेव सहिताय नमः
ऊर्ध्व प्राग्दक्षिणोदीच्य पश्चिमेषु मुखेषु तान् विन्यसेद्यथा हंसः व्योमाग्नि संयुतः
सन्यादि पंचह्रस्वाढ्यो बीजमेषाममी इति नम् हंसः सकारः व्योमहकारः अग्निः रेफः
सद्योकारः नवादि पंचकं ऊं ऐं अं इकार स्वरूपं स्वस्वबीजेन महर्षि सहर्षि महर्षि समह
र्षि समहर्षि ऊर्ध्वमुखे महर्षि ईशानाय मनोभव सहिताय नमः पूर्वमुखे महर्षि तत्पुरुषाय
मकरध्वज सहिताय नमः दक्षिणमुखे महर्षि अघोराय कुमार कंदर्प सहिताय नमः

८२

उत्तरमुखे महरिंवामदेवाय मन्मथाय सहिताय नमः पश्चिममुखे सहं संसद्योजाता
य मकरध्वजसहिताय नमः अथ करन्यासः षड्दीर्घयुक्तेनाद्येन बीजेना गाङ्क्रियामा
न। ह्रां अंगुष्ठाभ्यां नमः ह्रीं तर्जनीभ्यां नमः ह्रूं मध्यमाभ्यां नमः ह्रैं अनामिकाभ्यां न
मः ह्रौं कनिष्ठिकाभ्यां नमः ह्रः करतलकरपृष्ठाभ्यां नमः अथांगन्यासः ह्रां हृदयाय
नमः इत्यादि अस्त्राय फट् इत्यन्तं ऊर्ध्वाधेनालत्रयं क्लोंदिकामिदेशदिशो बध्नीयात्।
अथ पंचबाणन्यासः पंचबाणानत्र क्रमेणांगुष्ठकांगुलिषु विन्यसेत्। अंगुष्ठादिकनिष्ठा
न्तेक्रमेण परमेश्वरि द्रांद्रींक्लींब्लूंसः इति मोहकं चन्द्रमाः सर्गवान्भवेत् तेनमः पंचबाणाः इमे
देवि नामानि शृणु पार्वति शोभनो द्रावणो देवि तथा कर्षणमेव च वशोन्मादौ क्रमे
णैव कथितानि वरानने कामान्ते चैव विज्ञेया तेषां बीजानि संशृणु परा बीजं मध्यबा
णे वाग्भवं परमेश्वरि तुर्यबाणंकृतं चैव स्त्रीबीजेनतल्लमाख्यिये पंचकामा इमे देवि ना
मानि शृणु वल्लभे कामममन्मथ कंदर्प मकरध्वज संज्ञकाः मीनकेतुमहेशानि पंचमः स
मीरितः चन्द्रमाः सकारः द्रांद्रींक्लींब्लूंसः इति पंचबाणाः क्लींक्लींऐंब्लूंस्त्रीं इति पंचका
माः द्रां शोभनाय नमः इत्यादिक्रमेणांगुष्ठादिषु न्यसेत् क्लीं कामाय नमः इत्यादिक्रमेण
अंगुष्ठादिषु न्यसेत् अनेन मूर्धादिषु न्यसेत् पंचबाणांस्ततो न्यस्य मंत्री त्रैलोक्यमोह

श्री॰
२३६

नान् ह्रां मध्ये ह्रां विषेणेत्युरसि ह्रीं मायांतो मोहिन्यं पदे क्लीं वशीकरणं वदेत् गले ब्लूं बीजं सर्वि
कामं आकर्षणं हृदि पुनः सर्गांतो भृगुः सं पुनः सं मोहिनी क्रमात् विबाणान्न्यासो यमीरितः ।
न्यासो यथा मूर्ध्नि ह्रां द्राविण्यै नमः पादयोः ह्रीं ह्रोभिण्यै नमः गले क्लीं वशीकरिण्यै नमः गु
ह्ये ब्लूं आकर्षिण्यै नमः हृदि सः संमोहिन्यै नमः सर्गांतो भृगुः संपुनः इति भृगुः सकारः सर्गो
विसर्गः तेन सः इति भवति अथ षड्भगादिन्यासः भालभ्रूमध्यवदनकंठिकाकंठे हृन्नाभ
नाभ्यधिष्ठानयोः पंचनाराचाः सुभगादिकः न्यसेत् आविधिना देवीमंत्रिणा सुभगा भगा
भगसर्पिण्यथ परा भगमालिन्यनंतरम् अनंगानंगकुसुमा ह्यनंगमेखला अनंग
मदनाः सर्वा मदविभ्रममंथराः बाकुकामक्लपुनः स्त्रीं सः नाराः पंचोदिताः श्रमी न्यासे क्रमात्
ह्वरणाख्येन तः साधकसत्तमः न्यासो यथा ऐं क्लीं ब्लूं स्त्रीं सः सुभगायै नमो ललाटे भ्रूमध्ये ऐं
क्लीं ब्लूं स्त्रीं सः भगायै नमः मुखे ५ भगसर्पिण्यै नमः कंठमध्ये ५ भगमालिन्यै नमः कंठे ५ अनं
गायै नमः हृदि ५ अनंगकुसुमायै नमः नाभौ ५ अनंगमेखलायै नमः स्वाधिष्ठाने लिंगे ५
अनंगमदनायै नमः अथ भूषणन्यासः न्यसेत् किरीटं भालभ्रूकर्णादियुगलेन मि गं
डयोरोष्ठयोर्दंतपंक्त्योर्नासिकायां न्यसेत् स्तनान् चिबुके युगले कंठे पार्श्वयोः स्तनयुग्मके दोर्मूल
योः कूर्परयोः पाणिपादतलप्रदेशयोः नाभौ गुह्ये पुनश्चापि वंशे जानुनोर्जंघयोस्तथा स्फिचोस्तलतलयोः पश्चाच्चरणांगुष्ठयोस्त

पार्वतींगतानामेष हृदये न्यस्या नेत्रेषु समर्पिताः

८८

कांच्यां ग्रैवेयके पश्चात्कटके हृदि मध्यके कर्णकुंडलयोर्मूले लीवल्लनान्नृशान्मनात्
ध्रुवं श्रुत्वा विभाव्य विन्यसेद्देवि देशिकसत्तमः कांच्यादि पदे नमस्त्यानो पलल
के भ्रूकर्णादिषु द्विद्विवर्णन्यासः इति न्यासो यथा शिरसि अं नमः ललाटे आं न
मः भ्रूयुगे इं नमः ईं नमः कर्णयुगे उं ऊं नमः अक्षियुगे ऋं ॠं नमः नासायां लृं नमः
गंडयोः लॄं एं नमः ओष्ठयोः ऐं ओं नमः दन्तपंक्त्योः औं अं नमः मुखे अः नमः चिबुके ।
कं नमः गले खं नमः कंठे गं नमः पार्श्वयोः घं ङं नमः स्तनयोः चं छं नमः दोर्मूल
योः जं झं नमः कूर्परयोः ञं टं नमः पाण्योः ठं डं नमः स्तनपृष्ठयोः ढं णं नमः नाभौ तं ।
नमः गुह्ये थं नमः ऊर्वोः दं धं नमः जान्वोः नं पं नमः जंघयोः फं बं नमः स्फिचोः ऊरु
मूलयोः भं मं नमः नखवलयोः यं रं नमः चरणांगुष्ठयोः लं वं नमः कट्योः शं नमः ग्री
वायां षं नमः कुक्षिवलयस्थाने सं नमः हृदि हं नमः गले लं नमः कर्णयोः मौलौ क्षं
नमः ज्ञानार्णवे एवं न्यस्तशरीरोऽसौ समाहितमनाः स्वतः परमानंदसंदोहस्वानंदसि
द्धये न्यसाम् ततो हृत्पद्ममध्ये देवीं ध्यायेत उद्यद्भानुसहस्रकांतिमरुणक्षौमां शिरोमा
लिकां रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वरां हस्ताब्जैर्दधतीं त्रिनेत्रविलस
द्वक्त्रारविंदश्रियं देवीं बद्धहिमांशुरत्नमकुटां वंदे समंदस्मिताम् इति ध्यात्वा मान

श्री
२३७

सोपचारैराराध्य योनिमुद्रां बद्ध्वा हृदयमुखभ्रूमध्यललाटब्रह्मरंध्रेषु न्यसेत् क्रमेण तथा यो
न्यासाद्धृदि विन्यस्ता त्रैलोक्यक्षोभणी भवेत्। त्रैलोक्यद्रावणी नाम मुखस्था परमेश्वरि भ्रू
मध्यस्था महेशानि त्रैलोक्याकर्षणी भवेत्। ललाटस्था महेशानि त्रैलोक्यवशकारिणी
ब्रह्मरंध्रस्थिता सैव सर्वाह्लादकरी परा। एवं मुद्रामयीं देवि योनिमुद्रां प्रदर्शयेत्। इति नम
स्कृत्य स्वपात्रं स्थापयेत्। यथा स्ववामे ईकारगर्भं त्रिकोणं विलिख्य तदुपरि षट्को
णं वृत्तं चतुरस्रं कृत्वा तदुपरि त्रिपदिकामारोप्य मं वह्निमंडलाय धूम्रार्चिरादिदशकला
त्मने नमः इति त्रिपदिकां संपूज्य फडिति शोधितमर्घ्यपात्रं संस्थाप्य मृतजलमापूर्य उं सोम
मंडलाय अमृतादिषोडशकलात्मने नमः इति जलं संपूज्य तज्जले षडंगेनाभ्यर्च्य
हसक्षमलवरयूं आनंदभैरवाय वषट् नमः। हसक्षमलवरयीं आनंदभैरव्यै वौषट् इति
जलं संपूज्य जलं संस्पृशन् मूलमंत्रमष्टधा जप्त्वा गंधपुष्पादिनाभ्यर्च्य त्रिविधास्त्रेणाभिरक्ष्य
कवचेनावगुंठ्य धेनुमुद्रयामृतीकृत्य योनिमुद्रां प्रदर्श्य तस्मिन् जले त्रिकोणं वि
लिख्य तन्मध्ये च पंचरत्नानि पूजयेत्। ग मो च य व लाः पश्चादिंद्राः क्रमतः शिवे
वामकर्णसमायुक्ता नादबिंदुविभूषिताः। बीजपंचकमेतत्तु पंचरत्नानि संवदेत्। ग्लूं ग
गनरत्नाय नमः। म्लूं मर्त्यरत्नाय नमः। स्लूं स्वर्गरत्नाय नमः। प्लूं पातालरत्नाय नमः। न्लूं नागरत्नाय नमः। गमो

णकारमकारौ यकारवकारलकाराश्च मध्ये इंद्रो लकारः वामकर्णः ॐकारः इति पंचरत्नैः
संसृज्य ॐ गंगे च यमुने चैवेत्यादिना सवितृमंडलात्तीर्थमावाह्य तद्दक्षिणे प्रोक्षणी
पात्रे किंचिज्जलं निक्षिप्य तेनोदकेनात्मानं पूजोपकरणं चाभ्युक्ष्य यंत्रोपरि पीठं पूज
येत् कर्णिकायै मंडूकाय नमः कालाग्निरुद्राय नमः ॐ कच्छपाय नमः ॐ आधार
शक्त्यै नमः ॐ प्रकृत्यै नमः ॐ कूर्माय नमः ॐ अनंताय नमः ॐ पृथिव्यै नमः ॐ क्षीरस
मुद्राय नमः ॐ रत्नद्वीपाय नमः ॐ कदंबवनाय नमः ॐ स्वर्णमयकल्पवृक्षाय नमः
ॐ मणिमंडपाय नमः ॐ रत्नसिंहासनाय नमः आग्नेयादिकोणेषु ॐ धर्माय नमः
ॐ ज्ञानाय नमः ॐ वैराग्याय नमः ॐ ऐश्वर्याय नमः ॐ पूर्वादिदिक्षु अधर्माय अज्ञा-
नाय अवैराग्याय नमः अनैश्वर्याय नमः पुनः कर्णिकायां उपर्युपरिक्रमेण अं सूर्य
मंडलाय नमः उं सोममंडलाय नमः मं वह्निमंडलाय नमः सं सत्त्वाय नमः रं रजसे न
मः अं अंतरात्मने नमः पं परमात्मने नमः ह्रीं ज्ञानात्मने नमः ततः केसरेषु नवश
क्तीः पूजयेत् इच्छायै नमः ज्ञानायै नमः क्रियायै नमः कामिन्यै नमः कामदायिन्यै
नमः रत्यै नमः प्रियायै नमः नंदायै नमः मनोन्मन्यै नमः ऐं परायै नमः अपरायै नमः
परापरायै नमः सायुधानंतराले श्रीगुरुभ्यो नमः परमगुरुभ्यो नमः परमेष्ठिगुरुभ्यो नमः

श्री·
२३८

238

ह्सौः सदाशिवमहाप्रेतपद्मासनाय नमः ततो दिनकरकिरणारुणकुसुमांजलौ बहु
नासापुटेन स्वहृदयाद्देवीं समानीय पंचभिः प्रणवैर्मूर्तिं तस्यां मायाबीजेन पूजयेत् ततो वा
कुशक्तिकमलासनस्वरूपे हसौः पुनः रन्यासनमेवादौ विशेषः ॐ ह्रीं ऐं श्रीं हसलप्रे
सौः इति मंत्रः मूलमुच्चार्य श्रीमहात्रिपुरभैरवीममृतवेनन्यमूर्तिं कल्पयामि नमः १
इति मूर्तिं संकल्य देव्याः प्राणप्रतिष्ठां कुर्यात् यथा ॐ ह्रीं क्रों हंसः श्रीत्रिपु
रभैरव्याः प्राणा इह प्राणाः पंचबीजं ५ श्रीत्रिपुरभैरव्या जीव इह स्थितः पंच ५ श्रीत्रिपुर
भैरव्याः सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा इ
ति प्राणान् प्रतिष्ठाप्य आवाहन्यादिमुद्राः प्रदर्श्य षडंगं विन्यस्य पुनः ध्यात्वा षोडशोपचा
रैः पूजयेत् यथा आसनं स्वागतं चार्घ्यं पाद्यमाचमनीयकम् मधुपर्काचमनस्नानव
स्त्राभरणानि च सुगंधं सुमनो धूपदीपनैवेद्यवंदनम् प्रयोजयेदर्चनायामुप
चारांस्तु षोडश यथा इदमासनं श्रीत्रिपुरभैरव्यै नमः स्वागतमिति कुशलप्रश्नं
इदमर्घ्यं इदं पाद्यं इदमाचमनीयं एष मधुपर्कः इदमाचमनीयं इदं स्नानीयं १
एतानि पट्टवस्त्राणि इदमाभरणं एष गंधः इदं पुष्पं एष धूपः एष दीपः
श्रीत्रिपुरभैरव्यै नमः ततो नैवेद्यं पुरतः समानीयास्त्राय फट् इति जलेन प्रोक्ष्य

त्य ह्रैः इति वामहस्ततर्जन्यावगुंठ्य वमिति धेनुमुद्रयामृतीकृत्य तदुपरि मूलमंत्रं जप्त्वा
इदं नैवेद्यं त्रिपुरभैरव्यै नमः इत्युत्सृज्य जलं गृहीत्वा अमृतोपस्तरणमसीति जलगंडूषं
दत्त्वा प्राणाय स्वाहा अपानाय स्वाहा समानाय स्वाहा उदानाय स्वाहा व्यानाय स्वाहा इ
ति पंचप्राणाहुतीर्दत्त्वा तस्याः स्वीकारं विभाव्य अमृतापिधानमसि स्वाहा इति पुनरपो
शानं दत्त्वा इदं पुनराचमनीयं श्रीत्रिपुरभैरव्यै नमः इति एतानि ताम्बूलानि त्रिपुरभै
रव्यै नमः श्रीत्रिपुरभैरव्यै नमः इति पुष्पांजलित्रयेण संपूज्य श्रीत्रिपुरभैरवीं तर्पया
मीति व्यापकं त्रिवारं संतर्प्य षडंगेन पूजयेत् यथा ह्स्रां हृदयाय नमः ह्स्रीं शि
रसे स्वाहा ह्स्रूं शिखायै वषट् ह्स्रैं कवचाय हुम् ह्स्रौं नेत्रत्रयाय वौषट् ह्स्रः
अस्त्राय फट् इति पूर्वादिदिक्षु संपूज्य श्रीत्रिपुरभैरव्यै नमः इति नमस्कृत्य आवरणा
न्पूजयेत् यथा मध्यत्रिकोणे अग्रकोणे ऐं रत्यै नमः दक्षकोणे ऐं प्रीत्यै नमः वाम
कोणे ऐं मनोभवायै नमः ततोऽष्टयोनिषु अष्टशक्तीः पूजयेत् ऐं क्लीं ल्वं स्त्रीं सः सुभगा
यै नमः पंचबीजानि ५ भगायै नमः ५ भगसर्पिण्यै नमः ५ भगमालिन्यै नमः ५ अनं
गकुसुमायै नमः ५ अनंगमेखलायै नमः ५ अनंगमदनायै नमः ततः केसरेषु पूर्वादि
क्रमेण ब्राह्म्यादिशक्तीः पूजयेत् यथा ब्राह्म्यै नमः माहेश्वर्यै नमः कौमार्यै नमः वैष्णवै

श्री· २३५

नमः वाराह्यै नमः इंद्राण्यै नमः चामुंडायै नमः महालक्ष्म्यै नमः पत्राग्रेषु असितांगाय न
मः रुरवे नमः चंडाय नमः क्रोधाय नमः उन्मत्ताय नमः कपालिने नमः भीषणाय न
मः संहाराय नमः तदग्रे इंद्रादीन् पूजयेत् तद्बहिः तेषामस्त्राणि पूजयेत् ततः पुष्पा
ञ्जलिं त्रयेण देवीं संपूज्य प्राणायामं कृत्वा गुरुभ्यो नमः इति गुरुं तन्मस्तके पूजयेत् जपं स
माप्य पुनः प्राणायामं कृत्वार्घोदकेन गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि
मयं समर्प्य जपं परमेश्वर्याः परिसृह्य तत्त्वविभाव्य मूलेन ताम्बूलं निवेद्य पुनर्गंधादिभिः
संपूज्य योनिमुद्रां प्रदर्श्य श्रीत्रिपुरभैरव्यै नमः इति नत्वा स्तुत्वा देवीं प्रणामं कृत्वा उप
विश्य अर्घोदकेन इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु म
नसा वाचा कर्मणा पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भव
तु स्वाहा मां मदीयं च सकलं त्रिपुरभैरव्यै समर्पये इत्यात्मानं समर्प्य नमस्कृत्य इदं
पुनराचमनीयं श्रीत्रिपुरभैरव्यै नमः इति मूलमन्त्रं स्मरणं त्रिपुरभैरवि विसृजितासि
त्वमेवेति संहारमुद्रया स्वहृदि समानीय प्राणायामं कृत्वात्मानं तद्रूपं विभाव्य ति
माल्यं पुष्पं गृहीत्वा निर्माल्यवासिन्यै नमः इति ऐशान्यां क्षिपेत् ततश्चरणोदकं पीत्वा नैवे
द्यं स्वीकृत्य यथासुखं विहरेत् इति श्रीत्रिपुरभैरवीपूजापद्धतिः अनेन नित्यहोमं कृत्वा च पूर्वोपचारेण देवि

निर्माल्यं समर्पयेत्

मूलमंत्रेणदेवेशिकुर्यात्सेवाञ्जलीः क्रमात् प्राणायामैस्तथाध्यानस्वदानस्वसमान
कः पुनस्तत्स्वरूपंजानीयाद्दाक्षिणीनांचपंचकम् षडाङ्गतैःषडङ्गेषुनित्यहोमोयमीरितः
नित्यहोमविधिंकृत्वाबलिदानविधिंचरेत् ईशानादिषुकोणेषुमंडलानांचतुष्टयम् ।
श्रीचक्रमभितोदेविवित्रिकोणाख्यमथालिखेत् व्योमव्यापकमंडलेवेमथ्यं: अथवेतिस
मस्तार्थं बलिदानस्यतन्त्रविधानात् विकल्पपक्षशस्तैनतत्रैवसकलबलिदानमिति
कश्चित् सर्वमंत्रैःसमभ्यर्च्यवटुकादिकमग्रिजे एह्येहिदेवीपुत्रोनिवटुकोनितनाथन्
कपिलानजटाभारभास्वरांनेत्रिनेत्रव ज्वालामुखंनसर्वानेविघ्नंनाशयनाशय सर्वो
पचारसहितंबलिंगृह्णद्विपापदम् वक्रिणायाखिलोमंत्रोवटुकस्यसमीरितः अने
नविधिनादेविवटुकस्यबलिंहरेत् एह्येहिदेवीपुत्रवटुकनाथकपिलजटाभारभा
स्वरत्रिनेत्रज्वालामुखसर्वविघ्ननाशय २ सर्वोपचारसहितंबलिंगृह्ण २ स्वाहा ॥ इ
तिमंत्रः ॐ यें ब्लाडनोवादिविगगनतलेभूतलेतिथलेवापातालेकाननेवासलि
लेपवनेयोमंत्रकुत्रस्थितावा देवेपीठोपपीठादिषुवृक्षनपदाभ्रूपदीपादिकेनशीला
देभ्यःसदानःप्रभवबलिविधिनापान्त्रवेवेड्वंद्याः एतदेनोमहेशानियोबीजंयोगिनीं
नतःभ्यःस्वाहासर्वमंत्रोनेयोगिनीपदमालिखेत् कवचंचास्त्रमालिख्यवह्निनाया

पुनर्लिखेत् अनेन मन्त्रेण देवि योगिनीबलिमाहरेत् ह्रैं ह्रं स्वं यानेत्त्रं यां योगिनाभ्यः
स्वाहा योगिनी हूं फट् स्वाहा इति मन्त्रः षट्दीर्घस्वरसंभिन्नेन तकारे पुनर्वा लिखेत् तका
रे बिन्दुमाधाराद्यलिणामूर्तिसंहिता यां योगिनीनां कथ्यते पुनः क्षेत्रपदं पालं श्च प
सीपादिवा लिखेत् सहितं पद्ममालिख्य गंधपुष्पं गृह्णा ततो लिखेत् वह्निजायान्वितो
मंत्रः क्षेत्रपालस्य सुन्दरि अनेन मन्त्रेण देवि क्षेत्रपालबलिं हरेत् क्षां क्षीं क्षैं क्षौं तः क्षेत्रपा
ल धूपदीपादि सहितं गृह्ण २ स्वाहा इति मंत्रः गां गीं गंदं पूर्णमालिख्य ततो गणपतिं वदे
त् वांते वरदोतेथ सर्वं जनं मालिख्य मे वशं वानयेत् तत्काबलिं गृह्णाद्विपाय
स्व वह्निजायान्वितो मंत्रो गणपतये बलिं हरेत् गां गीं गें गणपते वरवरद सर्व
जनं मे वशमानय बलिं गृह्ण स्वाहा इति मंत्रः वामांगुष्ठानामिकाभ्यां वटुकस्य ब
लिं हरेत् अंगुष्ठमध्यमानामाभ्यां योगिनीकारेण योजयेत् वाममुष्टिं विधायादौ तर्जनी
सरलां कुरु अनया मुद्रया देवि क्षेत्रपालबलिं भवेत् तथा मुष्टिस्थमध्यमां मेरुलिम
रलां कुरु गजदंतमहामुद्रा गणपतये बलिर्भवेत् अनेन विधिना देवि कुर्यात् परमेश्वरीम्
पुरश्चरणे वर्णलक्षं जपेन्मंत्रेण तद्दशांशेन जुहुयात् तर्पणं ततः कुर्यात् सर्वसौभाग्यमाप्नुयात् निवेदये
त् बलिं देवि जपेदित्यर्थः अङ्के भैरवी जपादयतिदेशात् तत्तन्मात्रा विद्यांतरेण गत्वा तत् शक्तिनत्थानंदशसंख्यत्वादितिवस्तुतः

नत्वार्थलत्ताबधीतिप्रपंचमार्गस्य स्वात् नवविधेयः प्रस्पृगभेदपरत्वात् कलौसं-
ख्याचतनगंगमाशस्मभियानादित्यर्थः अथपञ्चदीक्षितिः ॐ ब्लाद्यः स्तुतिशतेनशोधित्
लाहूपाज्ञानेनिनैवजगदादिममादित्तिनिम नमाहृयंकचतनातवक्त्रं कमाभास्वा-
लोमनमः सकलधाम्नप्रमानस्वरूपाम् १ मयः महत्त्वा दिवाकराभाविधातहृत्ववरदाभ
यविकटहस्ताम् नेत्रोत्पलैस्त्रिभिरलंकृतनवक्त्रपद्मां ब्रह्माभारतविधात्रिपुरेमञ्जामः
सिंहप्रभुरतचिकेचभारतंध्रजन्मान्तरेषुकृतपुण्यफलैकलभ्यम् अन्योन्यभेदकल
हाकुलमानमभेदजातेनिर्विकिंजडपिमत्वपवरूपमेव २ स्थूलावदन्तिमुनयः श्रुतयोमहा
णोनिहलोवदंतिवचसामपिधामसन्ये नाम्हलमाहुरपरेजगतांभवानिमन्यामहे
वयमपारकृपांबुराशिम् ४ चंद्रावनेसकालितांशरदिंदुशुभ्रां पंचाशदक्षरमयीं हृदि
भावयंति त्वांपुस्तकंजपवटीममृताद्यकुंभव्याख्यांचहस्तकमलैर्दधतींत्रिनेत्राम्
तेभस्त्वमद्रिजनयाकलितांधभागो विलसत्कसंगकमलापरिनदद्देहः पद्मोद्भवस्त्वम
सितागिराविसमृद्धिमेत्यबांकियाघ्नगार्गत्रिपुरेत्वमेव ८ आश्रित्यवाग्भवभवांश्चतुरः
परादीन्भवानवेदपुरविसृतान्समदारपंतीम् कर्णादिभिस्वकरणैः परदेवतांत्वांसंविल
सीहृदिकदापिनविस्मरामि ७ आकंठबाहुमवजितकवैरिवदरकमालाकाररिमलापया

२

५

श्री०
२४१

तिजनामिकाग्रम् ध्यायंति मूर्ध्नि कलितेंदुकलावतंसं त्वद्रूपमेव कृतिनस्तरुणार्कमित्र
म् ८ त्वं याप्यमस्य पुरि यो वपुरर्धभागं स्मर्हि करोषि जगतामिति वेदवादः। मन्ये न तद्वि
नन येन गलेकमानं नीचेद्दशेषजगतः स्थितिरेव न स्यात् ९ ब्रह्मा विधाय कुसुमैः स्मर
पादपानां पीठेन वाबकनकाचलकेंद्रेषु गायंति सिद्धवनिताः सह किन्नरीभिरास्वा
दितासवरसारुणनेत्रपद्माः १० विस्फालितामसवघूर्णितमावहंती यां नीलवाससमव
नाप्तिकलां जपानीम् सांद्रं यमार्गकमलानि निकाम[illegible]यंती देवीं भजेन परमामस्तमितक्रमा
द्रीम् ११ आनंदजन्मभवनं भवनं श्रुतीनां चैतन्यमात्रतनुमेव नवाश्रयामि ब्रह्मेशवि
ष्णुभिरुपासितपादपद्मां सौभाग्यजन्मवसतिं त्रिपुरे यथावत् १२ शब्दार्थभाविभवा
नंदमहं नतोऽस्मि रूपायमानहिमभानिपुणार्ककेन चक्षुःस्पृशा[illegible] वक्राग्निकाहरनितम्बकलेषु
गांते तेना[illegible]रदामन[illegible]जान न विस्मरामि १३ नारायणीति नरकार्णवतारणीति गौरी
ति खेदशमनीति सरस्वतीति ज्ञानप्रदेति नयनत्रयभूषितेति त्वामद्रिराजतनये ति
बुधा वदंति १४ ये स्तुवंति जगन्मातः श्लोकैर्द्वादशभिः क्रमात् त्वामनुप्राप्य वाक्सिद्धिं
प्राप्नुयुस्ते परां श्रियम् ॥ इति श्रीभैरवीस्तोत्रम् ॥ अथ काम्यानि होमयत्रं कृत्वा दध्या बिल्वपत्रे
लामानवः यं यं काममयते कामी तं तं समवाप्नुयात् ललाटस्य[illegible]

पनसाप्रसूनैर्हुत्वा हुत्वा श्रीमवाप्नुयाद्दिनीम् हुत्वा यावनयान्यैश्च पुत्रलाभो भवेन्नृणाम् ।
ललावोमाहिषः अष्टमीदेवतादेव्याः नवमीदिनेष्वेव च गन्धैः सम्पूजयेद्यस्मान्महाविभव
विलैः पलाशकुसुमाशोकाश्मवलसीं च विवर्जयेत् सज्जनान्नानकीभूयान्नृत्यवापिधि
यं हरेत् तथा निवेद्य एवं सिद्धमनन्तमैश्वर्यमासाद्यते दिवमात्मनः एवं कृते भवेद्धृद्याण्यरमा ।
यावसानिर्भवेत् रक्तोत्पलैर्विमध्यैर्रक्तैर्णैर्वाहयारिजैः पुष्पैः पयोत्रैः स छ्वैर्हामादि
संवशं नयेत् हयारिः करवीरः पयोत्रयामयं स वाक्सिद्धिं लभते मंत्री पलाशकुसुमाजि
तैः नृत्तं कुर्यात्तरुणी भोजै रुद्रहैमं भुवाविनैः लक्ष्मीसंपन्नदर्पं वा अन्नहं भोजयेद् द्विजान्
वनितानां पुनर्नार्याः श्रीणायं देवतापि या होमान्ते पनयान्यात्यै स्नातयेत्क्रमात्मनः ।
कस्तागुरुसंयुक्तं गन्धलं च हुयात्सुधीः ज्ञानं दिव्यमवाप्नोति तेन सभवेत्कविः श्री
गंधैरगरुनालैर्द्देहोमः सर्वापमृत्युजित् हुत्वाभिरापुषेहोमः श्रीगन्धामिदिनत्रयम् ति
विकर्णी भवे पुष्पैर्वालिपूर्णान्वशमानयेत् गिरिकर्णीमपराजिता कल्हारैः पार्थिवान्सु
षेप्तंद्वयुः कर्णिकारजैः मल्लिकाकुसुमैर्हुत्वा राजपुत्रान्वशं नयेत् कोरण्टकुसुमैर्व
षणान्हृषमलान्याद्दलाभवेः कोरण्टैः जितेन्द्रियं संयुक्तिः अनुलोमविलोमानः स्थित्वैतस्या
हुयाद्विनम् मंत्रमन्त्राणामष्टकुर्यान्मंत्रीमसूर्लोडिनैः मरिचैर्भिसंयुक्तं मिष्टैर्वशयेन्नारीं

श्री.
२५२

वाल्वणात् एतेनैव विधानेन तत्स्त्रीस्तम्भनान्यपि एवं बिल्वभवैः पुष्पैर्मधुत्रयसंयुतैः
नरनारीनरपतीन्होमतो वशमानयेत् मालतीबकुलोद्भूतैः पुष्पैश्चन्दनलोडितैः जुहु।
यात्कवितामेधां लभते वत्सरान्तरे मधुरत्रयसंयुक्तैः फलैर्बिल्वसमुद्भवैः जुहुयाद्व।
शयेल्लोकान्स्त्रियमायोनिपुष्कलाम् पाटलैः कुसुमैः कुन्दैः कृष्णैलैर्नागचम्पकैः नेपा
वतैर्विकसितैः कनमालैश्च होमानि यः गायनेवत्सरादर्वाक्स्त्रियापि जितपार्थिवः।
नेयावन्तेऽगः साज्यमन्त्रेश्च जुहुयाच्च वेदत्र समस्तद्रिमान् कस्तूरीकुंकुमोपेतेन कर्पूरेण जुहु।
मादृशो केदंयाहयिकेसयः सौदर्यमौपगच्छति लाजाज्य जुहुयात्को वी दीपितो रमयु
ग्मनान् विजित्यलोकानखिलान्सजीवेत्कराणतम् पादद्वयंमलयजं पाटेकुंकुम
केसरम् पादंगोरोचनोविशोराणिपिष्टाहिमांभसा विदध्यात्तिलकं भालेयात्पष्यो
नवोद्भ्रते यान्सूणोदृश्याने येवावश्याः सुतस्यतेविधात् कुंकुमकापिचोरासिसमभा
गानिवाल्यचेत चन्दनभागाजटामांसीनावनीरोचनामता कुंकुमसमभागस्यात्रिभा
गं चन्द्रंमतम् अगुरुनवभागः स्यात् विभागाः क्रमेणव हिमाद्रिः कन्यका पिष्टमे
नत्वेसमापितम् आदायतिलकं भाले कुर्याद्भूमिपतीश्वरान् वनितामदगवीच्या
मदोमन्तान्नवतेगजान् सिंहान्व्याघ्रान्महासर्पान्भूतवेतालराक्षसान् दर्शनादेव वश्येत्तिलकंधारयन्नरः।

७५

इत्यागमकल्पलतायां भैरवीसपर्याविधिरेकोनविंशतिपटलः वक्ष्यामि छिन्नमस्ताया
विद्यां सर्वार्थसिद्धिदाम् योज्ञात्वा मनुजः सर्वां परां सिद्धिमवाप्नुयः फेत्कारीतंत्रसंदिष्टचो
द्धारं प्रयत्नतः कथयामि समासेन साधकानां सुखावहम् तद्यथा लक्ष्मीलज्जा तथा
माया मात्राद्वादशिकाप्यथ वज्रवैरोचनीये मायायुग्मं ततः परम् फट्कारेण समायुक्तं
स्वाहान्तं तदनन्तरम् लक्ष्मीः श्रीः लज्जा क्लीं माया ह्रूं मात्राद्वादशिका ऐं वज्रवैरोचनी
ये स्वरूपं मायायुग्मं ह्रूं ह्रूं फट्कारः स्वरूपं स्वाहास्वरूपं तेन श्रीं क्लीं ह्रूं ऐं वज्रवैरोचनी
ये फट् स्वाहा इति षोडशाक्षरो मंत्रः लक्ष्मीबीजेन दारिद्र्यस्यान्तदा श्रीः सर्वतोमुखी लज्जा
बीजेन चाप्येन वश्यतां याति योषितः मायाबीजेन चाप्येन महापातकनाशनम् मा
त्राद्वादशिकाबीजमाद्यं स्यान्मुक्तिकारणम् तस्याध्यानं ब्रवीनरे वामाक्षिवह्निसंयुक्तं
बिन्दुनादविभूषितम् शिवबीजं महेशानि लज्जाबीजमुदाहृतम् ईशानमद्रसंयु
तारिबीजं सबिन्दुकं नादविभूषितेन च सवामकर्णोपरितः प्रकल्प्य मायां वदेत्तो हमा
नोषिणास्मामिति तत्रैवोक्तेः मात्राद्वादशिकेति द्वादशस्वरवर्णः स्यात्सार्द्धबिन्दुविभू
षितः इति तत्रैवोक्तेः मंत्रान्तरमाह अनादिबीजं मंत्रस्य कीर्तयेन्मंत्रविमनः वज्रवैरोच
नीयेस्वान्मायाबीजं ततः परम् फट्स्वाहया समायुक्तं मंत्रं मंत्रिमहोरगम् सर्वसिद्धि

प्रदं पुराणं भुक्तिमुक्तिफलावहम् अस्तादिबीजं शं ऌकारः वज्रवैरोचनीये स्वरूपं मायाबी
जं ह्रूं ह्रूं फट्स्वाहा स्वरूपं तेन वज्रवैरोचनीये ह्रूं ह्रूं फट्स्वाहा इति त्रयोदशाक्षरो मन्त्रः ।
तथा चोक्तं भैरवीतन्त्रे प्रणवेन त्रयो देवा ब्रह्मविष्णुमहेश्वराः वकारे वरुणः साक्षात् जका
रे च सुराधिपः रेफे हुताशनो देवो वकारे च सुराधिपः यकारे त्रिपुरा देवी रेफे त्रिपुरसुंद
री त्रैलोक्यविजया देवी सदैवाकारसंभवा चकारे चण्डमाहेश्वो नकारेऽपि विनायकः ईका
रे कमला साक्षात् एकारे च सरस्वती मायायुग्मेन तथा देवी प्रकृतिः सहसंगता फट्कारे श
क्तिः साक्षात् स्वाकारे कुसुमायुधः हाकारे च रतिः साक्षात् एवं मन्त्रं समन्वयः इति मन्त्रवा
सना इति मन्त्रवर्णकथनेन द्वितीयमन्त्रस्यैवाभिधानात् प्रथममन्त्रे प्रणवस्य योनाभि
मानाभावात् न च बोधरावपिपवमङ्ग्रात् यदि च तन्त्रे प्रणवेन समायुक्तो मन्त्रः सर्वा
र्थसाधकः इति पाठः तदा प्रणवयोगेन मन्त्रान्तरत्वमित्यर्थः इति भावः तन्त्रान्तरे शक्ति
स्विन त्रिवाग्बीजं तारमेवान्ते समुद्धरेत् वज्रवैरोचनीये ते भगवान् साक्षात् भवेत् कूर्चमा
स्त्रं द्वितीये शक्तिमन्त्र इति तः शक्तिः क्रौं च त्रिवर्णं वाग्बीजं पं तारः ॐ भगवान् एका
रः साक्षात् यकारः क्रूं हूं अस्त्रं फट् द्विठः स्वाहा तेन क्लीं ह्रूं वज्रवैरोचनीये ह्रूं फट्स्वाहा इ
ति पंचदशाक्षरश्च शक्तिमन्त्रः तथा भैरवीस्तुतिः योनिः ... सप्ताक्षरात नेत्रे देवता छिन्नमस्ता साक्षाद्धि जैमायायुग्मं भवेत् मायायुग्मं कूर्च

तत्त्वबोधे शृणु देवि प्रवक्ष्यामि घोरसौदर्शिनामपि रमाकूर्चेन तथा लज्जा वाग्भवेव
चैव परम् रोचनीये पराहंहम त्वमंत्रोऽग्निवल्लभा रमा श्री कूर्चबीजं द्वे लज्जा क्री
वाग्भवं वज्रवैरोचनीयेस्वरूपं पराहं हं क्रौं क्रौं अस्त्रं फट् अग्निवल्लभा स्वाहा तथा
च श्रीं ह्रीं क्लीं ऐं वज्रवैरोचनीये क्रीं क्रीं पराहं स्वाहा इति षोडशार्णो मंत्रः त्रिशक्तिमंत्रोय
था तथा च मंत्रान्तरमाह देवाग्रे वज्रवैरोचनीये सर्वपदं वदेत् बुद्धडाकिनि तथालीयेव
ज्रमन्त्रं प्रकीर्तयेत् वर्णिनीये शिवं षष्ठस्वरयुग्विन्दुचंद्रवत् हेयाफट्वह्निवनिताभा।
लत्वेषमन्त्रमहात् देवाग्रेॐ वज्रवैरोचनीयेस्वरूपं सर्वबुद्धडाकिनीये वज्रवर्णिनी।
येस्वरूपं शिवो हकारः षष्ठस्वर ऊकारः बिंदुरनुस्वारः चंद्रोर्धचंद्रः हेयाकूर्चबीजद्वयं फ
ट्स्वरूपं वह्निवनिता स्वाहा तेन ॐ वज्रवैरोचनीये सर्वबुद्धडाकिनीये वज्रवर्णिनी
ये हूं हूं फट् स्वाहा इति सप्तदशाक्षरो मंत्रः अस्य पूजाविधिं वदे सर्वसौभाग्यदायिनी
म् ब्राह्मे मुहूर्ते उत्थाय स्वशिरसि प्रातः श्रीनाथादिनाद्गुरून् ध्यात्वा मानसोपचारैराराध्य
गुरुभ्यो नमः इति नमस्कृत्य देवीं ध्यायेत् कुलकुंडलिनीं सुषुम्नामार्गेण षट्चक्रभेदक्र
मेण परमशिवे नीत्वा ऐक्यं विभाव्य मनसाराध्य मूलाद्विब्रह्मरंध्रांतं बिसतंतुतनीय
सीम् साक्षादमृतानंदस्वरूपिणीं तत्प्रभापटलव्याप्तशरीरं परिचिंतयेत् आत्मानं तत

श्री
२४४

हूं फं विभाव्य बहिर्गच्छेत् ततः प्रातः कृत्यं समाप्य स्नात्वा पीठे न यावत् गत्वा यथोक्तविधिना ।
स्नात्वा पानेवा समीपे परिपाप्य चन्यमंत्रेण यथाशक्ति जप्त्वा गृहे गच्छेत् गायत्री यथा ।
ॐ वज्रवैरोचनीये विद्महे छिन्नमस्तायै धीमहि तन्नो देवी प्रचोदयात् गृहे गत्वा हस्तौ पा
दौ प्रक्षाल्य पूजास्थाने प्रविश्य रक्तकंबलमासनमास्तीर्य ॐ आधारशक्तिकमलासना
य नमः इति आसने संस्थाप्य तदुपरि स्वस्तिकाद्यासनक्रमेणोपविश्य ततः स्वर्णादि पीठे
रक्तचंदनकुंकुमादिना यंत्रं लिखित्वा अग्रे पीठोपरि स्थापयेत् यथा चतुर्द्वारं भूपु
रं तन्मध्ये षट्दलपद्मं विलिख्य तन्मध्ये भानुमंडले सत्वरजस्तमोरूपं रेखात्रयपुतं त्रिको
णं विलिख्य तन्मध्ये त्रिकोणरेखास्त्रिहारपूर्वं योनिमंडलं विलिख्य त्रिकोणमध्ये
ये हूं हूं फट्कारं च लिखेत् इति यंत्रं लिखित्वा यथोक्तपीठे संस्थाप्य वामेनकृ
र्म्यां नमः वज्रिणी ... नमः श्रीं ह्रीं छिन्नमस्तायै नमः इति नमस्कृत्य सम
स्तोपसर्गोक्तप्रकारेण भूतशुद्धिं कुर्यात् यथा सोऽहं ... नि पापपुरुषं हृदि
मंत्रेण हृदयाज्जीवात्मानं कुलकुंडलिनी षट्चक्रभेदेन सहस्रदलकमलकर्णि
कांतर्गतपरमात्मनि संयोज्य पृथिव्यादीनि तत्त्वानि प्रविलाप्य पुरुषाकारभाक् प
नादिभवं संचिंतं प्रलहन्याग्निरस्कं चेद्यादि वामकुक्षौ विचिंत्य रक्तवर्णं वामेन सियमिति वायुबीजं षोडशवारं जपे

१९५

वामनासापुटेन वायुना देहमापूर्य पुनर्यमिति चतुःषष्टिवारं जपन् कुंभकं कुर्वन् दे
हसंशोष्य पुनर्यमिति द्वात्रिंशद्वारं जपन् दक्षनासापुटेन वायुं रेचयेत् ततो रूपेण वायुसंब
द्धेन रमिति वह्निबीजेन षोडशवारं जपेन दक्षनासापुटेन वायुना देहमापूर्य चतुःषष्टि
वारं जपेन कुंभकं कुर्वन् तद्भस्मीभूतं विचिंत्य रमिति द्वात्रिंशद्वारं जपन् वामनासया
भस्मना सह वायुं रेचयेत् ततः ठमिति चंद्रबीजं भ्रूमध्ये प्रकल्प्यामृतात्मके वामनासापुटेन पु
नः पानात्मकं ललाटचंद्रं षोडशवारं जपन् रेचयेत् ततो वमिति चतुःषष्टिवारं जपन् लला
टचंद्राद्गलितामृतरसैर्मातृकाक्षिप्तिनिपात्य तया देवोपासनयोग्यं सकलं वपुः कुर्वन् लमि
ति द्वात्रिंशद्वारं जपन् दक्षनासापुटेन वायुं रेचयेत् पुनर्नासापुटाभ्यां वायुमवष्टभ्य हं
सः सोहं अवतर २ शिवपदाज्जीव शिवं सुषुम्नापथेन प्रविश मूलशृंगाटमुल्लसो
ल्लसहंसः सोहं स्वाहा ततः पृथिव्यादीनि तत्त्वानि यथास्थाने स्थापयित्वा प्रत्यग्देवीं
समानीय हृदि हंसं देवता आं ह्रीं क्रों हंसः मम प्राणा इह प्राणाः एवं पंचबीजानि ५ म
म जीव इह स्थितः एवं ५ मम सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य
सुखं चिरं तिष्ठन्तु स्वाहा इति जीवन्यासेन ततः प्राणायामं कुर्यात् यथा इडावक्त्रे वामे
नसि हमिति बीजं षोडशवारं जपन् वायुना देहमापूर्य पुनस्तमेव चतुःषष्टिवारं

श्री.
२४५
२४६
245/246

जपेत् कुंभकं कुर्वन् पुनस्तमेव वारं जपेत् इडया नासापुटेन वायुं रेचयेत् एवं वारत्रयं
कुर्यात् अथ ऋष्यादिन्यासः अस्य मंत्रस्य भैरव ऋषिः सम्राट् छंदः छिन्नमस्ता देवता हुं
हुं बीजं स्वाहा शक्तिः अभीष्टसिद्धौ विनियोगः शिरसि भैरवऋषये नमः मुखे सम्राट्
छंदसे नमः हृदि छिन्नमस्तायै नमः कृतांजलिः ममाभीष्टसिद्धौ विनियोगः ततो
मातृकान्यासं कुर्यात् कनिष्ठादिक्रमेण करांगन्यासं कुर्यात् आं खड्गाय हृदया
य नमः कनिष्ठयोः ईं सुखड्गाय शिरसे स्वाहा अनामिकयोः ऊं वज्राय शिखायै वष
ट् मध्यमयोः ऐं पाशाय कवचाय स्वाहा तर्जन्योः औं अंकुशाय नेत्रत्रयाय वौषट् अंगुष्ठ
योः अः सुरक्षाय अस्त्राय फट् करतलपृष्ठयोः ततो अंगन्यासं कुर्यात् यथा आं खड्गाय
हृदयाय स्वाहा हृदये ईं सुखड्गाय शिरसे स्वाहा ऊं वज्राय शिखायै वषट् ऐं पाशाय क
वचाय स्वाहा स्कंधादि भुजद्वयपर्यंते औं अंकुशाय नेत्रत्रयाय वौषट् नेत्रत्रये अः सुरक्षाय
अस्त्राय फट् इत्यस्त्रं घोरेतालत्रयं दत्वा छोटिकाभिः दशदिग्बंधनं कुर्यात् ततो भूतशुद्धिं
पुनः कृत्वा देवीरूपं विचिंतयेत् बलिछिद्रप्रमाणं तत्यापदीपकलिकाग्रमानं घोरे शा
वर्षदेशी योध्यायेन्मंडलसंस्थिताम् पुनर्नरशरीरेमपि यान्मनोमंत्रविग्रहः देवी ध्याने
प्रवक्ष्यामि सर्वकामार्थसिद्धये इंगला पिंगला चैव सुषुम्णा च विशेषतः त्रिनाडीसंगता देवी त्रिगुणा त्रिविधा

छि

श्वेतरक्तान्तकृष्णोगौर्यालीशाविलम्बितः स्वनाभौ नीरजं ध्यायेद्द्वंद्वं विकसितं सितम्
तत्पद्मकोशमध्ये च मण्डलं चण्डरोचिषः जपाकुसुमसंकाशं नवबन्धूकसन्निभम् रजः
सत्त्वतमोरेखा योनिमण्डलसन्निभम् मध्ये चैव महादेवीं सूर्यकोटिसमप्रभाम् देवीं ता
चक्रे वामे धारयन्तीं स्वमस्तकम् प्रसारितमुखं भीमं लेलिहानोग्रजिह्वकम् मम
रक्तौघपिबन्तीं धारां तिजकण्ठसमुद्भूताम् विकीर्णकेशनिचयां नानाभूषणभूषिताम् ।
दिगम्बरां महाघोरां प्रत्यालीढपदस्थिताम् रतिकामोपविष्टां तां केचिद्ध्यायन्ति यो
गिनः विपरीतरतिस्थां च ध्यायेद्युतिमनोहराम् वर्णिनीडाकिनीयुक्तां वामदक्षिणपा
र्श्वयोः दक्षिणे वर्णिनीं ध्यायेत् डाकिनीं वामके तथा वर्णिनी लोहिता सौम्या मुक्तके
शी दिगम्बराम् कपालकर्त्रिकाहस्ता वामदक्षिणयोगतः देवीगलोच्छलद्रक्तधा
रापानं च कुर्वतीम् अस्थिमालाधरां देवीं नागयज्ञोपवीतिनीम् डाकिनीं वामपार्श्वे तु
कल्पान्तज्वलनोपमाम् विद्युज्जटाभनयनां दन्तपङ्क्तिबलाकिनीम् दंष्ट्राकराल
वदनां पीनोन्नतपयोधराम् महादेवीं महाघोरां मुक्तकेशीं दिगम्बराम् लेलिहानम
हाजिह्वां मुण्डमालाविभूषिताम् करस्थेन कपालेन भीषणेनातिभीषणाम् आघ्रा[?]
निषेवितां ध्यायेद्देवीं साधकसत्तमः अपरं तत्प्रवक्ष्यामि शृणु देवि यथाक्रमम् स्वनाभौ

श्री०
२४७

247

नीरजं सूर्यभानमंडलमंडितम् योनिचक्रसमायुक्तं गुणत्रयसमन्वितम् तन्मध्ये महा
देवीं ध्यायेन्नमस्तामपि देवताम् प्रदीपकलिकाकारामतिभीमां अवस्थिताम् करकञ्जोप
कोकबद्धाबद्धपद्मासनस्थिताम् योनिमुद्रासमायुक्तां हृदयस्थितलोचनाम् इतीदृनिक
लेध्यानेन तथा वा निकलेस्थितम् इतिध्यात्वा मानसोपचारैराराध्य नमस्कृत्य अर्घपात्रं स्था
पयेत् तद्यथा त्रिकोणमंडलं कृत्वा तदुपरि त्रिपदिकामारोप्य मं वह्निमंडलाय दश
कलात्मने नमः इति त्रिपदिकां संपूज्य अस्त्राय फट् इत्यर्घपात्रं प्रक्षाल्य तदुपरि संस्थाप्य
अं सूर्यमंडलाय द्वादशकलात्मने नमः इति पात्रं संपूज्य मूलमंत्रं जपेत् शुद्धजलमा
पूर्य ॐ सोममंडलाय षोडशकलात्मने नमः इति जलं संपूज्य मूलमंत्रमष्टधा जप्त्वा
ङ्गेणांगं सकवचेनावगुंठ्य धेनुमुद्रयामृतीकृत्य तत्र गंधपुष्पादीनि निक्षिप्य ते
नोदकेनात्मानं संप्रोक्ष्य पूजोपकरणं चाभ्युक्षयेत् ततो यंत्रोपरि पीठाम्नायं पूजयेत् यथा आ
धारशक्तये नमः कूर्माय नमः अनंताय नमः पृथिव्यै नमः सुधासमुद्राय नमः।
रत्नद्वीपाय नमः कल्पतरूद्यानाय नमः स्वर्णवेदिकायै नमः कल्पवृक्षेभ्यो नमः रत्न
मंडपाय नमः रत्नसिंहासनाय नमः आनंदकंदाय नमः संविन्नालाय नमः सर्वत
त्त्वात्मकपद्माय नमः प्रकृतिमयपत्रेभ्यो नमः विकारमयकेसरेभ्यो नमः पंचाशद्बीजाढ्यक

१९

ऐं सूर्य्यमेरुलाय द्वादशकलात्मने नमः ॐ सोममेरुलाय षोडशकलात्मने नमः मं वह्नि
मेरुलाय नमः सं सत्त्वाय नमः रं रजसे नमः तं तमसे नमः आं आत्मने नमः अं अन्तरात्म
ने नमः पं परमात्मने नमः ज्ञं ज्ञानात्मने नमः ॐ गन्धेन नमः क्लीं कामाय नमः मूलेन
श्रीछिन्नमस्तादेव्यै आसनाय नमः इति संपूजयेत् ततो मूलाधारस्य दीपकलिकाका
रतेजः स्वहृत्पंकेरुहस्थितं बिम्बं ततो यमैः षट्चक्रभेदक्रमेण परमशिवं नीत्वा।
तामेव शिवयोगेन स्थूलतामपगतां दत्तनासापुटेन निस्सार्य कुसुमाञ्जलावानी
य यंत्रोपरि स्थापयित्वावाहयेदनेन ॐ सर्वसिद्धिप्रदे वर्णिनीये सर्वसिद्धिप्रदे शक्ति
नीये छिन्नमस्ते पद्येहि मम सिद्धिं देहि देहि हुं हुं फट् स्वाहा इति मंत्रेन ततो यं
त्रोपरि स्थापयित्वा यंत्रस्थायाः प्राणप्रतिष्ठां कुर्यात् आं ह्रीं क्रों स्वाहा छिन्नमस्तायाः
प्राणा इह प्राणाः एवं ५ छिन्नमस्ताया जीव इह स्थितः एवं छिन्नमस्तायाः सर्वेंद्रिया
णि वाङ्मनश्चक्षुः श्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा इति प्राणप्रतिष्ठा
कृत्वावाहयेत् भगवति श्रीछिन्नमस्ते इहागच्छ इह तिष्ठ सन्निहिता भव सन्निरुद्धा
भव अत्राधिष्ठानं कुरु मम पूजां गृहाण इत्यावाहनस्थापनसन्निधापनसन्निरोधना
मृतीकरणसकलीकरणावगुण्ठनमुद्राभिर्देवीमावाह्य देव्यंगे षडंगानि विन्यस्य ७

छं गृहीत्वा पुनर्देवीं ध्यात्वा षोडशोपचारैः पूजयेत् यथा पाद्याद्याचमनेति ततो मूलमंत्रे
ण पाद्यादिकं दद्यात् यथा मूलमुच्चरन् इदं पाद्यं छिन्नमस्तायै कल्पयामि नमः एषो
र्घः छिन्नमस्तायै नमः स्वाहेति केचित् एवं इदमाचमनीयं इदं स्नानीयं वस्त्रे आभर
णानि गंधं पुष्पं धूपं दीपं चंदनं नैवेद्यं पुरतः समानीयार्घजलेनाभ्युक्ष्यास्त्रेण मं
हुं कवचेनावगुंठ्य वमिति धेनुमुद्रयामृतीकृत्य तदुपरि मूलमंत्रमष्टधा जप्त्वा इदं नै
वेद्यं छिन्नमस्तायै कल्पयामि नमः इत्युक्त्वा अमृतोपस्तरणमसि स्वाहेति जलं गंडूषं द
त्वा प्राणाय स्वाहा अपानाय स्वाहा समानाय स्वाहा उदानाय स्वाहा व्यानाय स्वाहा इ
ति पंच प्राणाहुतीर्दत्वा नत्वा स्वीकारं विभाव्य अमृतापिधानमसि स्वाहेति पुनरा
पोशानं दत्वा इदमाचमनीयं छिन्नमस्तायै कल्पयामि नमः इति आचमनीयं दत्वा
पुनस्तांबूलानि छिन्नमस्तायै कल्पयामि नमः मूलमुच्चरन् छिन्नमस्तायै
इदं पुष्पं छिन्नमस्तायै वषट् नमः इति पुष्पांजलित्रयेणाभ्यर्च्य श्रीछिन्नमस्तां तर्पया
मि नमः स्वाहा इति देव्या मुखे वारत्रयं मनसा ततो देवीं दक्षिणावामक्रमेणावरणपूजां
कुर्यात् हुं इत्यनेनाभ्युक्ष्य आवरणान् पूजयेत् यथा वायव्यां गणेशाय नमः ऐशान्यां
गुरुभ्यो नमः आग्नेय्यां परमगुरुभ्यो नमः नैरृत्यां क्षेत्रपालाय नमः एवं करालाय नमः

दक्षिणे अतिकरालाय नमः पश्चिमे विकरालाय नमः उत्तरे महाकरालाय नमः म
ध्ये ॐ आधारशक्त्यै नमः ॐ कूर्माय नमः ॐ अनन्ताय नमः ॐ पृथिव्यै नमः ॐ आनंदा
कंदाय नमः ॐ नालाय नमः ॐ पद्माय नमः ॐ कर्णिकायै नमः ॐ आदित्यमंडला
य नमः ॐ सोममंडलाय नमः ॐ वह्निमंडलाय नमः ॐ सं सत्वाय नमः ॐ रं रजसे नमः
ॐ तं तमसे नमः ॐ रत्यै नमः ॐ कामाय नमः इति संपूज्य पूर्वादिदिक्षु वामक्रमेण
पत्रेषु पूजयेत् ॐ क्लीं एकलिंगायै नमः ॐ क्लीं योगिन्यै नमः ॐ क्लीं डाकिन्यै नमः ।
ॐ क्लीं भैरव्यै नमः ॐ क्लीं महाभैरव्यै नमः ॐ इंद्राक्ष्यै नमः ॐ क्लीं असितांग्यै नमः ॐ क्लीं
संहारिण्यै नमः मध्ये देवीसिंहासनाय नमः देवीदक्षिणे ॐ क्लीं यक्षस्यै वर्णिन्यै नमः
वामे ॐ क्लीं यक्षस्यै डाकिन्यै नमः इति संपूज्य पुनरपि गायत्र्यादिभिर्देवीं संपूज्य पुष्पांजलि
त्रयेणाभ्यर्च्य मेषादिबलिं दद्यात् बलिमंत्रो यथा ॐ सर्वसिद्धिप्रदे वर्णिनी ये सर्वबु
द्धिप्रदे डाकिनी छिन्नमस्ते एह्येहि इमं बलिं गृह्ण २ मम सिद्धिं देहि २ हूं हूं फट् ।
स्वाहा इति बलिं दत्वा आत्मानं तद्रूपं विभाव्य गुरुं नमस्कृत्य प्रातः देवीगायत्रीं जप्त्वा मू
लमंत्रमष्टोत्तरमष्टसहस्रं शतं वा जपेत् गायत्री यथा वैरोचन्यै च विद्महे छिन्नमस्तायै धी
महि तन्नो देवी प्रचोदयात् इति जप्त्वा मूलं जपेत् ततो जपं समाप्य प्राणायामं कृत्वा

श्री.
२४५

249

छागरक्तैर्वा ॐ गृहाणेति गृहीत्वा दिनादेव्या वामहस्तेन नेत्रोद्भूपं जपं समर्प्य मूलमन्त्रेणानेनोद्भू
लेन निवेदयेत्तत्वादेउमणामं क्षौमोपविश्याथो देवीं नैवेद्यं सर्वं प्राणाहुति दद्यात् परमीपिकारतो ज्ञा
नत्वमस्य गुह्यस्य वस्याः समनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यां मदरेण शिश्नायत्स्मृतं यदुक्तं
यत्कृतं तेन तन्मे यं बद्ध्यापि एणा भवतु स्वाहा मां मदीयं च श्रीछिन्नमस्तायै समर्पये इत्यात्मानं स
परिच्छेदं देव्यै समर्पये इदं पुनराचमनीयं छिन्नमस्तायै कल्पयामि नमः ततो भगवति
छिन्नमस्ते सुजितामितमसेवस्तुस्वामिहोमहुत्याकृजामं उल्लासात्पुष्पमादाय पाय्यापयत्तत
ना सामुद्रेन देवीं स्वहृदि समानीयानेन मन्त्रेण मार्ग्यं यत् तत्र मन्त्रः उत्तरे शिखरे जाते
भूम्यां पर्वतवासिनि ब्रह्मयोनिसमुत्पन्ने गच्छ देवि ममान्तरे इति देवीमेन नीत्वा हृ।
त्पद्मे संस्थाप्यात्मानं तद्रूपं विभाव्य निर्माल्यं शिरसि धृत्वा चरणामृतं पीत्वा यथासु
खं विहरेत् इति छिन्नमस्तासपर्यापद्धतिः अथ स्तुतिः नाभौ शुभ्रसरोजमध्यविलस
द्बन्धूककुसुमारुणाभास्वद्भास्करमण्डलं तदुदरे योनिं च चक्रे मखम् तन्मध्ये विपरीतमै
थुनपरप्रद्युम्नसत्कामिनीपृष्ठस्थां तरुणार्ककोटिविलसत्तेजःस्वरूपां शिवाम् १
वामे छिन्नशिरो दधानदिनेशपाणौ महत्कर्तृकां प्रत्यालीढपदां दिगन्तवसनामुन्मुक्त
केशव्रजाम् छिन्नात्मीयशिरःसमुच्छलदसृग्धारां पिबन्तीं परां बालादित्यसमप्रकाशविलसन्नेत्रत्रयो
द्भासिनीम् २

वामादन्यत्रनाडीबहुबहलगलद्रक्तधाराभिरुच्चैः पायंतीमस्थिमूषाम्बकमल
लसत्कर्तिकोग्रग्रवर्णाम् रक्तामारक्तकेशामपगतवसनां वर्णिनीमात्मशक्तिं
प्रत्यालीढैकपादामरुणितनयनां योगिनीं योगमुद्राम् ३ दिग्वस्त्रां मुक्तकेशीं प्र
लयघनघटाघोररूपां प्रचंडां दंष्ट्राढ्यां दुष्प्रेक्ष्यवक्त्रोदरविवरवलल्लोलजिह्वोग्रभासम् ।
विद्युल्लोलाक्षियुग्मां हृदयतटलसद्भोगिभीमां सुमूर्तिं सद्यः छिन्नात्मकंठप्रगलि
तरुधिरैर्डाकिनीर्वर्धयंतीम् ४ ब्रह्मेन्द्रेशाच्युताद्यैः शिरसि विनिहितानन्दपादारविंदा
मात्मज्ञैर्योगिमुख्यैः सुनिपुणमनिशं चिंतितां चिंत्यरूपाम् संसारे सारभूतां त्रिभुवनजन
नीं छिन्नमस्तां प्रशस्तामशनिशप्रोतामिष्टदात्रीं कलिकलुषहरां चेतसा चिंतयामि
उत्पत्तिस्थितिसंहृतीर्घटयितुं धत्ते त्रिरूपां तनुं त्रैगुण्याज्जगतो यदीयविकृतिर्ब्र
ह्माच्युतः शूलभृत् तामाद्यां प्रकृतिं स्मरामि मनसा सर्वार्थसंसिद्धये यस्याः स्म
रपदारविंदयुगले लाभे भजंते नराः ५ आलिपिषिञ्जनपुरंधोभोगशून्यापरोहं बहु
विधकुलकर्मारंभसंभाविनोहम् पशुजनविमुखोहं भैरवीसंस्थितोहं गुरुचर
णपरोहं भैरवोहं शिवोहम् ७ इदं स्तवं महापुण्यं ब्रह्मणा भाषितं पुरा यः पठेत्सा
नतस्याय देव्याः सन्निहितोपि वा नस्य सिद्धिर्भवेद्देवी वांछितार्थप्रदायिनी यत्नेपान्ये

ग्रा॰

२५०

250

हतं जपं तोषयेद्भक्तिनमेवच वर्षं यावन्महाविद्यामन्त्रो सिद्धिं लभेद्ध्रुवम्‌ इति ग्रहलक्षणामेले
ख्यिग्रमलतात्रम्‌ अथ संवत्सरं यावत्फलहारी प्रयत्नतः विमलनामग्रहपरः शिवभक्तिप
रायणः यथाशक्ति जपेन्नित्यं ध्यात्वा देवीं यथोदिताम्‌ फलेषु फलात्तु कूष्माण्डश्रेष्ठं जनीये
प्रयत्नतः अथ संवत्सरे तीते शोध्येणान्तकमलकः मामध्येन भवेद्विद्यां विक्रमेणादि
वस्मृतिः सर्वज्ञः शोभनात्तुल्यतेजसा च दिवाकरः वर्षार्द्धं चैव नैहस्रे देवद्रूपं वहस्थाने य
यत्र चाभिचारस्यान्महादेवीं तु ततनरम्‌ शीघ्रं मारयति क्रुद्धा सर्वकामफलप्रदा अथ काम्या
नि भक्तो मल्लैश्च वशान्ते वश्ये तपुष्पाणि विनिःक्षिपेत्‌ आकृष्टौ च वशीकारे रक्तमेव विनिर्दि
शेत्‌ स्तम्भने मोहने मन्त्री पीतपुष्पाणि निःक्षिपेत्‌ उच्चाटने मारणे च कृष्णमेव विनिःक्षिपे
त्‌ काम्यकर्मणि सर्वत्र ध्यानं स्यात्पुष्पवर्णकम्‌ पुष्पवर्णाकमिति यद्वर्णपुष्पैः स्नाना
न्नहवर्णां देवतां ध्यायेत्‌ इत्यर्थः राज्ञो बलिः प्रदातव्यो मत्स्यमांसासवादिभिः अथ याम
पुष्पानाद्येमधुम्रे विभवविस्तरैः ताम्बूलवदनः श्रीमान्नाट्यभक्तिपरायणः जपेन्मा
त्रेविमुच्येत सर्वैरेव हि पातकैः ताम्बूलेन विना चैव मत्स्यमांसैस्तथासवैः मांसभक्ति
बलिर्देविमन्त्रसिद्धिं प्रयच्छति तस्मात्सर्वप्रयत्नेन बलिर्देयः सदामिषैः आमिषेण
विना न त्वदेवी न सिद्धिं प्रयच्छति हरेति वरमज्ञानि परम्‌ अथ वक्ति मधुपानेनि हदं

८१

यातं द्वीपादि कर्मं यास्यप्यवेनिकेचित् अन्यथा बलिदानेन त्वप्रसंगात् बलिदान
मंत्रः सूजापडुतो लिखितः अनास्याविध्रमत्यं नमप्रूजाजपकर्मणि आलस्यं भीरु
ताशक्ति मंत्रहानिः स्तनिश्चयः नास्ति द्वेषो न विद्वेषो न शौचं नियमो न च सिद्धमंत्र
जपानात्रयुगसेवापरिश्रमः नाग्रजपानउग्निहन्मं जालों मैं शूनेरतः सदा कालं जपे
मंत्रमिमं सर्वसिद्धिप्रदायकम् लिखित्वा स्वकरे मंत्रमानं संस्पृशेन्नरः विषं च निर्दृव
द्वेगान्तीर्यं मात्युच्छ्रजायते भस्मेन ध्यानमात्रेण मन्त्रमस्त्याप्येन्नरः महोत्पातप्रशान्ते देहे
मन्त्रमस्त्याप्येद्ध्रुवम् रक्तेन वश्यमायाति सर्वं मा क्रष्यते जगत् पीतेन स्तंभयेत् सर्वं
लोकं वाजिगजादिकम् कृष्णेन ध्यानयोगेन रिपुमुच्चाटयेन्नरः मारयेच्च प्रयत्नेन कृ
ष्णध्यानात्रसंशयः तर्पणं च प्रकुर्वीत मयसा पायसेन च आज्येन मधुना वापि स्मरणा
मंत्रसाधकः ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः सर्वे यथाक्रमम् तर्पणस्य विधानेन महाबलि।
हिः प्रजायते तथा क्षीरेण ब्राह्मणो लक्ष्यां तद्वेन तन्त्रपवशजैः सात्विकैः वैश्यवर्णो अ
ज्ञास्वैवं शूद्र जातिभिः ततो जपं प्रकुर्वीत जायते तेन सिद्धयः लक्षं जप्त्वा स्पृशेन्मंत्र सकल मे
त्सिद्धिं यच्छत्यसितम् सर्वं संपद्यते देवि जपहोमात्रसंशयः अथ होमविधिं वक्ष्ये सर्वसि
द्धिप्रदायिनीम् विधाय मंडले सर्वे सर्वांसंचयथाविधि षट्कोणे मंडले चैव वह्निः ॥

श्री॰
२५१

251

स्थापनमाचरेत् ततो होमं प्रकुर्वीत सर्वसिद्धिः क्रमस्मैरेवैः श्रीफलानां पलाशानां तथै
वोडुंबरस्य च सर्वसिद्धिप्रदो होमः कर्तव्यो त्रिमधुयुक्ततः शतमष्टोत्तरं कृत्वा जपेत्कुर्यां
ततः परम् मालतीकुसुमैर्होमः कर्तव्यो मधुसंयुतैः घृतेन सहितो वापि वागीशत्व
प्रदायकः आज्यपुष्पेन भक्तेन बलिर्देयः महामिषैः षण्मासं दीपसंयुक्तो लक्ष्मीस्त
स्थिरा भवेत् छागमांसं सरक्तं च घृतेन प्लावितं तथा योजहोत्यपुनर्देवि राजान
स्ववशो भवेत् घृतेन करवीरेण होमं सम्यक्करोति यः लक्षमात्रविधानेन सजीव
कालदहकः कणिकासहस्राणि योजहोति घृतैः सह सप्तासमानि परांसिद्धिमीप्सि
तोम्हरस्य धरे वेष्टकंकुसुमं कृत्वा घृतेनाप्युतसंछ्यकम् तस्य श्रीनामवे देवि सर्वसिद्धि
फलप्रदा तिलतंडुलहोमं तया घृतेन समाचरेत् जायते तस्य मित्राणि जायते सरस्वद
रि पायसेन चरेद्धोमं घृतेन सह सुंदरि त्रिसंध्यं मासमात्रं तु वागीशत्वमवाप्नुयात् ।१
तेष कथितो देवि क्रमो होमविधेर्मया अपरं च प्रवक्ष्यामि कामना या विशेषतः गो याम
सं च मधुना वा मत्स्येन होममाचरेत् अपि देवा वशं यान्ति किं पुनः क्षुद्रमानुषाः तत्तमांस
न साज्येन कृत्वा होमं वरानने सर्वसिद्धिमवाप्नोति स्वर्गे न मपिडुलं भम पललेमा द्वि
षे कृत्वा मधुना सहसंयुते समभयिता [illegible] बलं हरेपि संस्थितम् च एप कज्जूतसे [illegible] नगवरान्नजे रिपुसेन्यमहा [illegible] भय

सयोगोमापुमांसेनहोतव्येसरयान्वितम् नूनंहस्तेभवेन्नस्यसर्वसिद्धिप्रवर्तनम्।
गोमांपुंहोमयेयस्तुपलदेनसमोभवेत् जम्बामंश्रीकृतेनोराश्रोरांघ्रवविनिपातयेत् श्री
फलानांपलाशानांमूलेवोऽरस्यच योलहंहोमयेद्यस्तुपलदेनसमोभवेत् महा
मांसेनयःकश्चिद्धोमयेन्मंपुसंयुतम् शतमष्टोत्तरंदेविविसंध्येसाधकोत्तमः सर्वभक्ष
मेदिनीक्रान्ताचएमासेननसंशयः राज्यंनसमयमच्छेनिडाकिन्यःप्रीतिसंयुताः।
कोकिलापत्रलहेनयोजहोतिबितानले समाश्रयतिशत्रूणांबलंहरंमसंस्थितम्
काकपक्षैःकृतोहोमोदसराग्रेसमाहितः आलोडकाकहतेलेनसयोधाटनमारणे।
शान्तिकार्येनथापुष्टौचतुरस्रेसमाचरेत् वशीकारेत्रिकोणेचमारणेचाटनेन
था वर्तलेमेऽलाकारेंकुण्डेविचक्षणः भक्ष्याभक्ष्योतथादेविदीर्घकुंडेसमा
चरेत् अथबलिः ह्रींसर्वयोगिनीभ्योगृह्णगृह्णस्वाहाइतिगृह्यबलिंदद्यात् ततः
क्षेत्रपालःमंबलिंगृह्णस्वाहाइतिगृह्यकोणेदद्यात् क्षींक्षींदेवीपुत्रवटुकनाथ
कपिलजटाभारभास्वत्त्रिनेत्रइमंबलिंगृह्णगृह्णस्वाहाइतिगृह्यमध्येदद्यात्
ह्रींयोगिनीभ्यःसर्वक्षेत्रवासिनीभ्यःसर्वपीठोपपीठसर्वसंदेहोपसंदेहचत्वरोप
चत्वरवासिनीभ्यःइमंबलिंगृह्णस्वाहाइतिगृह्यमध्येदद्यात् मांसभक्ष्यबलिम्

श्री॰
२५२
252

अपरं च प्रवक्ष्यामि विद्यादृष्टप्रकाशकम् । अथ कृष्णत्रयोदश्यां मेषके वै निशार्धके ।
गत्वा श्मेनरगो भूत्वा विमुक्तो दशधा ततः । देवीरूपं स्मरन् मन्त्री ध्यायेद्वा साधकोत्त
मः । एवं मंडलमालिख्य षट्कोणानत्रमेलिखेत् । पूजयेत्तां देवीश्च मंडले कथितानः प्रि
ये नवनानाविधैः पुष्पैः श्वेतपुष्पकलोहितैः । देवीरूपणमेचिंम पूजयेत्साधकोत्तमः ।
सहस्रमयुतं वापि जपेद्भक्तिसमाहितः । बलिं च तत्र मंत्रेण दद्यात्कुक्षिसमन्वितान् । ता
म्बूलैश्च धूपैर्नैवेद्यालंकारभूषणैः । ब्राह्मणान्भोजयेत्तत्र सुवेद्दक्षिणां दत्वा । अने
नविधिना लक्ष्मीर्विद्यास्सर्वामवाप्नुयात् । एकरात्रेण लभते विद्यालक्ष्मीं न संशयः ॥
द्विरात्रेण यशोराशिस्त्रिरात्रेण गुरुः स्वयम् । विमुक्तः इति दशरात्रे यावत्संसगं भूत्य
द्रूयथेः । एवं कल्पं सदा कार्यं वलचारिधनेशिवे । अस्मिन्देहे महेशानि खेच्छ पा
कमिचारभेत् । भैरव उवाच । दिनशः प्रातरुत्थाय पश्यात्तलसमाश्रितः । ध्यात्वा भ
ह्ला क्लिं त्रैमंत्रं जपेदष्टोत्तरशतम् । त्रिशतं वा जपेत्त्रिलमष्टोत्तरसहस्रकम् । षण्मा
सेन महावाग्मी गद्यपद्यमयो भवेत् । वत्सराद्दशशास्त्राणां निश्चितं पारगो भवेत् । त्रिव
त्सराद्भवेद्धैवामीश्वरश्चापरः । तस्य दर्शनमात्रेण वादिनो निष्प्रभावताम् । पलायन्ते
तथा भूमौ यथा सिंहभयाद्गजाः । दृष्ट्वा शेनो गमंत्राणां मूलमंत्रान् सारजः सहस्रदानं जपेत्त्रिसंध्यं के चिद्यदा मिदं शिवे श्रीदीक्षा गविद्यात्रीच पोवि

संहारकारिणी पश्चात्त्रिमूर्तिः सेवकाश्यते ॥ इत्यागमकल्पलतायां विद्यामन्त्रोपासनाप्र
करणं नाम विंशः पटलः ॥ अथ प्रकीर्णकम् ॥ अथ सारस्वतमन्त्राः ॥ वद वद वाग्वादिनि स्वाहा
दशलक्षं जपेत् ॥ ॐ नमो भगवति वद वद वाग्वादिनि स्वाहा ॥ अष्टलक्षं जपेत् ॥ ॐ ह्रीं ऐं ह्रीं
सरस्वत्यै नमः द्वादशलक्षं जपेत् ॥ ऐं वाचस्पते अमृते प्लवः प्लुः एकादशलक्षं जपेत् ॥ ऐं
ह्रीं स्त्रीं त्रिलक्षं जपेत् ॥ अथ लक्ष्मीमन्त्राः ॥ श्रीं द्वादशलक्षं जपेत् ॥ ऐं श्रीं ह्रीं क्लीं द्वादशल
क्षं जपेत् ॥ नमः कमलवासिन्यै स्वाहा दशलक्षं जपेत् ॥ ॐ ऐं ह्रीं श्रीं क्लीं ब्लौं सौः जगत्प्रसू
त्यै नमः द्वादशलक्षं जपेत् ॥ ॐ ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महा
लक्ष्म्यै नमः लक्षं जपेत् ॥ अथ भुवनेश्वरीमन्त्राः ॥ ह्रीं द्वात्रिंशल्लक्षं जपेत् ॥ ऐं ह्रीं श्रीं द्वाद
शलक्षं जपेत् ॥ ऐं ह्रीं ऐं २४ लक्षं जपेत् ॥ आं ह्रीं क्रों २४ ॥ अथ त्वरितामन्त्राः ॥ ॐ ह्रीं हुं
खे च छे क्षः स्त्रीं हुं क्षे ह्रीं फट् १ हुं खे क्षः त्रिकण्टकीये २ क्षे स्त्रीं क्षः वषट् त्रिकण्टकीये त्रि
लक्षं जपेत् ॥ ॐ ह्रीं ऐं नित्यक्लिन्ने मदद्रवे स्वाहा ४ ऐं ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा ह्रां वज्र
प्रस्तारिणीये १ श्रीं ह्रीं क्लीं त्रिपुरे देव्य १२ ॐ आं ह्रीं क्रों एहि परमेश्वरि स्वाहा ॥ अष्टादश
ये ५ ॐ नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा ॥ षोडशसहस्रं जपेत् ॥ ह्रीं पद्मावति
स्वाहा २ इति नित्यादिमन्त्राः ॥ अथ दुर्गामन्त्राः ॥ ॐ ह्रीं दुं दुर्गायै नमः ॥ ८ महिषमर्दि

श्री॰
२५३
253

नि स्वाहा ६ ॐ दुं गें दुं गं वनदुर्गे स्वाहा ५ ज्वलज्वलशूलिनि दुष्टग्रह हुं फट् स्वाहा
वनदुर्गामंत्राः ३ उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थितम् यदि शक्यमशक्यं
वा तन्मे भगवति शमय स्वाहा ४ इति दुर्गायाः पंचमंत्राः अथ भैरवीमंत्राः बाला
ऐं क्लीं सौः हसरीं हसकलह्रीं हसौः २४ अथ मातंगीमंत्राः ऐं क्लीं श्रीं ॐ नमो भगव
ति श्रीमातंगेश्वरि सर्वजनमनोहरि सर्वमुखरंजिनि सर्वसुखरंजनि सर्वराजवशंकरि
सर्वदुष्टमृगवशंकरि सर्वसत्त्ववशंकरि सर्वलोकममवशं मे वशमानय स्वाहा अथ
प्रीत्यर्थं नाम च अयुतं जपेत् अथ गणपतिमंत्राः गं ४ महागणपतिमंत्राः ॐ श्रीं ह्रीं क्लीं
ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा १ गं क्षिप्रप्रसादनाय नमः
हेरंबमंत्रः ॐ गं हेरंब नमः २ अथोच्छिष्टगणपतिमंत्रः ॐ हस्ति पिशाचि लिखे १९ ...
ॐ हस्तिमुखाय लंबोदराय उच्छिष्टमहात्मने क्रों आं ह्रीं उच्छिष्टाय स्वाहा ॐ ह
स्तिमुखाय लंबोदराय उच्छिष्टमहात्मने आं क्रों ह्रीं ग्रीं घे घे उच्छिष्टाय स्वाहा ।
एकोनविंशत्यक्षरो मंत्रः १ अथ वक्रतुंडमंत्रः वक्रतुंडाय हुं वक्रतुंडाय क्लीं नमः ।
२ ... अथ हरिद्रागणपतिमंत्राः ॐ हुं गं ग्लौं हरिद्रागणपतये वरवरद सर्वजन
हृदयं स्तंभय स्तंभय स्वाहा   असाधिकमहत्त्वं जपेत् अथ कार्तिकेयमंत्रः ।

५५
।
८७

ॐ वं वज्राय नमः अथ वंशमंत्रः सौं सोमाय नमः १ अथ विद्यामंत्रः ॐ ऐं विद्ये विद्यामालिनि
चंद्रिणि चंद्रमुखि स्वाहा अथ सूर्यमंत्रः घृणि सूर्य आदित्य १ क्रां क्रीं सः १ हंसः १।
अथाग्निमंत्रः ॐ भूर्भुवः स्वरग्ने जातवेद इहावह सर्वकर्माणि साधय स्वाहा १ उत्तिष्ठ पु-
रुष हरिपिंगल लोहिताक्ष देहि ददापय स्वाहा १ अथ विष्णुमंत्रः ॐ नमो।
नारायणाय १ ॐ नमो भगवते वासुदेवाय १ ॐ क्लीं क्लीं श्रीं लक्ष्मीवासुदेवाय नमः १
अथ दधिवामनमंत्रः ॐ नमो विष्णवे सुरपतये महाबलाय १ अथ हयग्रीवमंत्रः उद्गि-
रत्प्रणवोद्गीथ सर्ववागीश्वरेश्वर सर्ववेदमयाचिन्त्य सर्वं बोधय बोधय ५ अथ रघु-
नाथमंत्रः रां रामाय नमः श्रीं सीतायै नमः अथ रघुनाथस्य मालामंत्रः ॐ नमो भग-
वते रघुनंदनाय रक्षोघ्नविशदाय मधुरप्रसन्नवदनायामिततेजसे बलाय रामाय वि-
ष्णवे नमः ॐ जानकीवल्लभाय स्वाहा अथ गृहाद्विवाहमंत्रः ॐ नमो भगवते वराहरूपा-
य भूर्भुवः स्वः पतये भूपतित्वं मे देहि ददापय स्वाहा १ अथ भरणामंत्रः ॐ नमो भग-
